

# 2 नूतनाः राजानः तेषां राज्यानि च

सप्तम्याः शताब्द्याः अनन्तरं बहूनां राजवंशानाम् उदयः अभवत् । 1 मानचित्रे उपमहाद्वीपस्य विभिन्नेषु भागेषु सप्तम्याः शताब्द्याः आरभ्यः द्वाद्वशशताब्द्याः मध्ये शासनकर्तारः प्रमुखाः राजवंशाः दर्शिताः सन्ति ।




(**1 मानचित्रम्** ) सप्तमशताब्द्याः आरभ्यः द्वादशशताब्द्याः प्रमुखानि राज्यानि |

? मानचित्रे गुर्जर-प्रतिहार-राष्ट्रकूट-पाल-चोल-चहमानानां (चौहानों) स्थानां निर्धारणं कुर्वन्तु । किं भवन्तः तेषाम् अद्यतनस्य राज्याणां चयनं कर्तुं शक्नुवन्ति येषां राज्याणाम् उपरि तेषां नियन्त्रणम् आसीत्?

## नूतनानां राजवंशानाम् उदयः

सप्तमशताब्द्याः आगमनात् पूर्वम् उपमहाद्वीपस्य विभिन्नेषु भागेषु महान्तः भूस्वामिनः योधृनायकाः अस्तित्वं प्राप्तवन्तः आसन् । राजानः प्रायः एतेभ्यः स्वाधीनरूपेण क्षेत्रपतिरूपेण च मान्यतां यच्छन्ति स्म । तेभ्यः आशा क्रियते स्म यत् ते राज्ञः कृते स्वामिनः च कृते उपहारवस्तूनि आनयेयुः । तेषां राजसभायाम् उपस्थितिः स्यात् तेभ्यः राजभ्यः सैन्यसाहाय्यं च दद्युः । अधिकायां सत्तायां प्राप्तायां सत्यां क्षेत्रस्वामिनः आत्मानं महाक्षेत्रस्वामिनः महामण्डलेश्वराः इति यः सम्पूर्णस्य मण्डलस्य महान् स्वामी भवति तथा आत्मानं घोषयन्ति स्म । कदाचित् कदाचित् ते स्वस्य स्वामिनः आधिपत्यात् स्वतन्त्राः वयम् इति उद्घोषयन्ति स्म ।

एवंविधम् उदाहरणं दक्कने राष्ट्रकूटानां आसीत् । प्रारम्भे ते कर्णाटकस्य चालुक्यनृपाणाम् अधीनस्थाः आसन् । अष्टमशताब्द्याः मध्यकाले एकः राष्ट्रकूटः प्रधानदन्तीदुर्गः स्वस्य चालुक्यस्वामिनः अधीनतां अनङ्गीकृतवान् । तं सः पराजितवान् अपि च हिरण्यगर्भ नामकं एकम् अनुष्ठानं कृतवान् हिरण्यगर्भस्य शाब्दिकः अर्थः स्वर्णस्य गर्भः इति भवति । यदा एतत् अनुष्ठानं ब्राह्मणानां साहाय्येन सम्पन्नं क्रियते स्म तदा एतत् मन्यते स्म यत् एतेन याजकः जन्मना क्षत्रियः न भवन् अपि अनेन क्षत्रियरूपे पुनः क्षत्रियत्वं प्राप्स्यति ।

केषुचित् अन्येषु उदाहरणेषु उद्यमिपरिवाराणां पुरुषाः स्वस्य राजतन्त्रं स्थिरीकरणाय सैन्य-कौशलस्य प्रयोगं कृतवन्तः । उदाहरणार्थं कदम्बः मयूरशर्मणः गुर्जर-प्रतिहारः हरिचन्द्रः च ब्राह्मणाः आसन् , ये स्वस्य परम्परागतां वृत्तिं परित्यज्य शस्त्रम् अङ्गीकृतवन्तः क्रमशः च कर्णाटके राजस्थाने च स्वस्य राज्यानि सफलतापूर्वकं स्थापितवन्तः ।

## राज्येषु प्रशासनम्

एतेषु नूतनेषु राजसु कैश्चित् महाराजाधिराजः अर्थात् राज्ञां राजानः त्रिभुवन-चक्रवर्तिनः अर्थात् त्रयाणां भुवनानां स्वामिनः एतादृशाः च अन्ये महान्तः उपाधयः प्राप्ताः ।परन्तु एतादृशीनाम् उद्घोषणानाम् अनन्तरं ते स्वस्य क्षेत्राधिपतिभिः सह कृषकानां व्यापारिणां ब्राह्मणानां च सङ्गठनैः सह च स्वस्य सत्तायाः सहभागितां कुर्वन्ति स्म ।



1 चित्रम्

एलोरायाः गुहा 15 इत्यस्य भित्तिचित्रम्, यस्मिन् विष्णुः नरसिंहरूपेण अर्थात् पुरुषसिंहरूपेण दर्शितः अस्ति। इयं राष्ट्रकूटकालस्य कृतिः अस्ति।

? किं भवतां विचारे तस्मिन् कालावधौ शासकं भवितुं क्षत्रियस्य रूपेण जन्म महत्त्वपूर्णम् आसीत् ?

एतेषु सर्वेषु राज्येषु उत्पादकेभ्यः अर्थात् कृषकेभ्यः पशुपालकेभ्यः शिल्पकारेभ्यः संसाधनानि एकत्रीक्रियन्ते स्म। एते सर्वे प्रायः स्वस्य उत्पादानाम् एकं भागं दातुं त्यक्तुं च बाध्याः क्रियन्ते स्म। कदाचित् एषः भागः कररूपेण स्वीक्रियते स्म यतोहि प्राप्तकर्ता अहं भूस्वामी अस्मि इति उद्घोषयति स्म। राजस्वं व्यापारिभ्यः अपि स्वीक्रियते स्म।

चतुर्शतं कराः !

तमिलनाडुराज्ये शासनकर्तुः चोलवंशस्य अभिलेखेषु विभिन्नप्रकाराणां कराणां कृते 400 तः अधिकाः सूचकशब्दाः मिलन्ति। सर्वाधिकाः उल्लिखिताः कराः सन्ति वेट्टी इति , यः मुद्राधनं परित्यज्य बलात् श्रमस्य रूपे गृह्यते स्म अर्थात् बलात् श्रमः भूराजस्वं च आस्ताम्। भवने आच्छादिते सति देयःकरः ,ताडवृक्षं खर्जूर-वृक्षं आरोढुं सोपानस्य प्रयोगे कृते दीयमानः करः ,पारिवारिक-सम्पत्तेः उत्तराधिकारं प्राप्तुं देयः करः इत्यादीनाम् अपि उल्लेखः लभ्यते।

? किं एतेषु कश्चित् करः अद्य स्वीक्रियते।

एतानि संसाधनानि नृपस्य व्यवस्थायाः वित्तीयाः आधाराः भवन्ति स्म , सार्धम् एव मन्दिराणां दुर्गाणां च निर्माणे अपि प्रयुक्ताः भवन्ति स्म। संसाधनानि तान् युद्धान् योद्धुम् अपि प्रयुक्ताः भवन्ति स्म,येभ्यः अपहरणरूपेण धनप्राप्तेः भूमेः प्रयोगेण धनप्राप्तेः व्यापारिकमार्गाणां प्रयोगस्य सम्भावनाः भवन्ति स्म।

करादानस्य कृते पदाधिकारिणां नियुक्तिः सामान्यतः प्रभावशालिनां परिवाराणां मध्यस्थात् एव क्रियते स्म वंशानुक्रमेण च सा भवति स्म। सेनायाम् अपि तथैव भवति स्म। कदाचित् नृपस्य समीपस्थाः सम्बन्धिनः एव एतेषु पदेषु भवन्ति स्म।

## प्रशस्तयः भूमेः अनुदानं च

प्रशस्तीषु एतादृश्यः सूचनाः भवन्ति स्म याः शब्दशः सत्याः अपि न भवितुं शक्नुवन्ती । परन्तु एताः प्रशस्तयः अस्मान् बोधयन्ति यत् शासकाः आत्मनः कीदृशान् दर्शयितुम् इच्छन्ति स्म ।उदाहरणार्थं बलशालियोधृरूपेण विजयियोधृरूपेण च । एताः विद्वद्भिः ब्राह्मणैः रचिताः आसन् ,ये प्रायः प्रशासने सहायतां कुर्वन्ति स्म ।

? प्रशासनस्य इदं रूपम् अद्यतन्याः व्यवस्थायाः केषु सन्दर्भेषु भिन्नः आसीत् ।

## नागभट्टस्य उपलब्धयः

केचन शासकाः प्रशस्तिषु स्वस्य उपलब्धीनाम् उल्लेखं कृतवन्तः । भवन्तः गतवर्षे गुप्तशासकस्य समुद्रगुप्तस्य प्रशस्तीनां विषये पठितवन्तः । संस्कृतेन लिखिता मध्यप्रदेशस्य ग्वालियरे प्राप्तायाम् एकस्यां प्रशस्त्यां प्रतिहारनरेशः नागभट्टस्य कर्मणां वर्णनम् अनेन प्रकारेण कृतवान् : ।आन्ध्रस्य सैन्धवस्य विदर्भस्य यः महाराष्ट्रस्य एकः भागः अस्ति कलिङ्गस्य राजानः तेषां पुरतः तदा एव पराजिताः जाताः यदा ते राजकुमाराः आसन् ..

ते कन्नौजस्य शासकं चक्रयुद्धं विजितवन्तः ....

ते वङ्गस्य यः बङ्गालस्य भागः आसीत् अनर्तस्य यः गुर्जरस्य भागः आसीत् ,मालवाक्षेत्रस्य यः मध्यप्रदेशस्य भागः आसीत् किरातस्य (वनवासी) तुरुष्कस्य (तुर्कः ) वत्सस्य मत्स्यस्य एतौ द्वौ उत्तरभारतस्य राज्ये आस्ताम् एतेषां राज्याणां राज्ञः पराजितवन्तः ।

राजानः प्रायः ब्राह्मणान् भूमेः अनुदानेन पुरस्कृतान् कुर्वन्ति स्म । एते ताम्रपत्रेषु अभिलिखिताः भवन्ति स्म ,एते भूमेः प्राप्तिकर्तॄणां कृते दीयन्ते स्म ।

? अस्मिन् अभिलेखे उल्लिखितेषु क्षेत्रेषु कानिचन् प्रथमे मानचित्रे अन्वेषणस्य प्रयासं कुर्वन्तु । अन्यैः राजभिः अपि एतादृशीः उद्घोषणाः कृताः आसन् । भवतां मतेः अनुसारं ते एतादृशीः उद्घोषणाः किमर्थं कृताः स्युः ?

चित्रम् -2 इदं किञ्चित् संस्कृतेन तमिलेन च लिखितः ताम्रपत्राणाम् एकः सङ्ग्रहः अस्ति , यस्मिन् नवम्यां शताब्द्यां एकेन शासकेन प्रदत्तस्य भूमेः अनुदानस्य उल्लेखः अस्ति। याभिः शृङ्खलाभिः एतानि सबद्धानि सन्ति तासु राजानां मुद्रा अङ्किता अस्ति या इदं ज्ञापयितुम् अस्ति यत् अयम् एकः प्रामाणिकः अभिलेखः अस्ति ।

भूमेः सार्धं किं किं दीयते स्म ?

अयं चोलैः प्रदत्तस्य एकस्य भूमेः अनुदानस्य तमिलभागस्य एकः अंशः अस्ति । वयं मृदायाः क्षेत्रसीमां निर्माय सार्धम् एव कण्टकिलान् स्तम्बान् योजयित्वा भूमेः सीमाः चिह्निताः कृताः । एतस्यां भूमौ एतानि वस्तूनि सन्ति ,फलिनः वृक्षाः जलं भूमिः उद्यानानि फलोद्यानानि वृक्षाः कूपाः रिक्तस्थानं गौचारणस्थलं एकः ग्रामः वापी मञ्चाः कुल्यः परिखाः नद्यः क्लिनाभूमिः जलाशयः अन्नागारः मत्स्यानां तडागाः मधुमक्षिकानां छत्राणि गभीराः जलाशयाः च ।

यः इमं भूमिं लभते सः एतया करादानं कर्तुं शक्नोति । सः न्यायाधिकारिभिः दण्डस्य रूपेण योजितान् करान् स्वीकर्तुं शक्नोति , ताम्बूलपत्रेषु निर्धारितः करः वयेषु वस्त्रेषु निर्धारितः करः ,सार्धम् एव वाहनप्रयोक्तॄणां कृते निर्धारितं करं स्वीकर्तुं शक्नोति । सः पक्वेष्टकैः राजस्वम् आधारीकृत्य महान्तः प्रकोष्ठान् रचयितुं शक्नोति लघूनां दीर्घाणां च कूपानां च निर्माणं कर्तुं शक्नोति वृक्षाणां कण्टकिलानां स्तम्बानां च आरोपणं कर्तुं शक्नोति । यदि आवश्यकं स्यात् तर्हि सः सेचनार्थं कूल्यानां निर्माणं कर्तुं शक्नोति । तेन इदं सुनिश्चितव्यं यत् जलस्य दुरूपयोगः न स्यात् तथा च तटबन्धानां निर्माणं भवेत् ।

? लेखे सेचनस्य येषां सम्भवानां स्रोतसाम् उल्लेखः अस्ति तेषां सूचीं कुर्वन्तु विचारविमर्शं कुर्वन्तु यत् एतेषां साधनानां प्रयोगः कथं भविष्यति ।

द्वादश्यां शताब्द्यां एकम् वृहत्संस्कृतस्य काव्यम् अपि रचितं,यस्मिन् काश्मीरेषु शासनकर्तृणां राज्ञांम् इतिहासः वर्णितः अस्ति । एतम् इतिहासः कल्हणः नामकः एकः रचनाकारः रचितवान् । कल्हणः स्वस्य वृन्तान्तं लेखितुं शिलालेखानां अभिलेखानां प्रत्यक्षदर्शिनां वर्णनां प्राक्-तनीयानां इतिहासैः सह विविधानां स्रोतसां प्रयोगं कृतवान् । प्रशस्तिनां लेखकेभ्यः भिन्नः सह प्रायः शासकानां तेषां नीतीनां विषये च आलोचनात्मिकीं दृष्टिकोणं दर्शयति , अतः द्वादश्याः शताब्द्याः कृते अयम् एकः असाधारणः ग्रन्थः आसीत् ।

## धनाय युद्धम्

भवन्तः इदम् अनुभूतवन्तः स्युः यत् एतेषु प्रत्येकं शासकस्य राजवंशस्य आधारः कश्चित् क्षेत्रविशेषः आसीत् । ते अन्येषु क्षेत्रेषु अपि नियन्त्रणं कर्तुं प्रयासं कुर्वन्ति स्म ।

एकः विशेषरूपेण वाञ्छनीयं क्षेत्रम् आसीत् –गङ्गायाः उपत्यकायां कन्नौजनगरम् । गुर्जर-प्रतिहारस्य राष्ट्रकूटस्य पालवंशानां च शासकाः शताब्दान् यावत् कन्नौजस्य उपरि नियन्त्रणं कर्तुं परस्परं युद्धं कृतवन्तः । यतोहि एतस्य दीर्घतरस्य युद्धस्य त्रयः पक्षाः आसन् , अतः इतिहासकाराः प्रायः एतस्य चर्चां त्रिपक्षीयसङ्घर्षस्य रूपे कृतवन्तः ।

यथा वयं 62 तः 66 तमं पृष्ठं यावत् द्रक्ष्यामःशासकाः दीर्घाणां मन्दिराणां निर्माणं कारयित्व स्वस्य सत्तायाः संसाधनानां च प्रदर्शस्य च प्रयासं कृतवन्तः । अतः यदा ते अन्येऽन्येषु राज्येषु आक्रमणं कुर्वन्ति स्म , तदा

मन्दिराणि अपि नष्टीकुर्वन्ति स्म , ये कदाचित् कदाचित् बहुसम्पन्नाः भवन्ति स्म । भवन्तः पञ्चमाध्याये एतेषां विषये अधिकं पठिष्यन्ति ।

अफगानिस्तानस्य गजनी इत्यस्य शासकः महमुदः एतादृशेषु शासकेषु सर्वाधिकः प्रसिद्धः अस्ति । सः 997 तमाद् शताब्दाद् 1030 तमं शताब्दं यावत्  शासनं कृतवान् । सः स्वस्य नियन्त्रणस्य विस्तारं मध्यैशियायाः भागान् यावत् अथ च ईरानस्य उपमहाद्वीपस्य च उत्तर-पश्चिमीभागान् यावत् विस्तृतम् आसीत् । सः प्रायः प्रत्येकस्मिन् वर्षे उपमहाद्वीपानाम् उपरि आक्रमणं करोति स्म । तस्य लक्ष्यं सम्पन्नानि मन्दिराणि आसन् येषु गुर्जरप्रान्तस्य सोमनाथस्य मन्दिरम् अपि सम्मिलितम् आसीत् । महमूदः यद् धनं परिहृत्य नीतवान् ,तस्य एकः विशालः भागः गजनीमध्ये एकस्य वैभवशालिन्याः राजधान्याः निर्माणे व्ययः जातः ।

शासकः महमूदः स्वात्मना जीतानां जनानां विषये अपि बहूनि तथ्यानि जानाति स्म सः अल-बेरूनी नामकं एकं विद्वान्सम् एतस्य उपमहाद्वीपस्य विवरणस्य लेखनस्य कार्यम् अर्पितवान् । अरबीभाषायां लिखिता तस्य कृतिः किताब-उल-हिन्द अद्य अपि इतिहासकाराणां कृते एकं महत्त्वपूर्णं स्रोतः अस्ति । अल-बेरूनी-महोदयः एतस्य रचनार्थं संस्कृतस्य विद्वद्भ्यः परामर्शं स्वीकृतवान् ।

योद्धृषु अन्येषु राजसु चाहमानः अपि आसीत् यः अनन्तरं चौहानस्य रूपेण विख्यातः । सः देहल्याः अजमेरस्य च पार्श्वेषु क्षेत्रेषु शासनं करोति स्म । सः पश्चिमं पूर्वं च यावत् स्वस्य नियन्त्रणक्षेत्रस्य विस्तारं कर्तुम् इष्टवान् , यत्र सः गुर्जरस्य चालुक्यैः पश्चिमी-उत्तर-प्रदेशस्य गहडवालैः सः युद्धं कर्तुं बाध्यः जातः । चाहमानानां सर्वप्रसिद्धः शासकः पृथ्वीराज-तृतीयः आसीत् यस्य कालः 1168  तः आरभ्यः 1192 इति यावत् आसीत् ,यः मुहम्मदगोरी नामकं अफगानशासकं 1191 तमे वर्षे पराजितवान् , परन्तु अपरस्मिन् एव वर्षे 1192 तमे वर्षे तस्मात् पराजितः अभूत् ।

? 1. मानचित्रं पश्यन्तु तानि च कारणानि ज्ञापयन्तु ,येषां कारणतः एते शासकाः कन्नौजस्य गङ्गायाः उपत्यकायाः उपरि नियन्त्रणम् इच्छन्ति स्म ।

सुलतान इति

अरबीभाषायाः शब्दः अस्ति,यस्य अर्थः अस्ति शासकः ।

?

1 मानचित्रं पुनः पश्यन्तु अथ च विचार-विमर्शं कुर्वन्तु यत् चाहमानाः स्वस्य क्षेत्रस्य विस्तारं किमर्थम् इष्टवन्तः स्युः ?

## चोलराज्यं – समीपात् एकः दृष्टिपातः




## उरैयूरतः तंजावूरं यावत्

चोलवंशः सत्तायां कथम् आगतः ? कावेर्याः नदीमुखपुलीने मुट्टरियारनाम्नः प्रसिद्धः एकस्य लघुतमस्य प्रमुखस्य परिवारस्य सत्ता आसीत् ते कांचीपुरम इत्यस्य पल्लवस्य राज्ञाम् अधीनाः आसन् । उरइयारस्य चोलवंशीयस्य प्राचीनस्य प्रमुखपरिवारस्य विजयालयः नवम्यां शताब्द्याः मध्ये मुट्टरियारान् पराजित्य एतस्मिन् नदीमुखपुलीने आधिपत्यं स्थापितवन्तः । तत्र सः तंजावूरनगरस्य निशुम्भसूदिन्याः देव्याः मन्दिरं च रचितवान् ।

विजयालयस्य उत्तराधिकारिणः प्रतिवेशिनः क्षेत्राणि जीतवन्तः तस्य राज्यं च स्वस्य क्षेत्रफले शक्तौ च द्वाभ्यां रूपाभ्यां वर्धितम् । दक्षिणस्य उत्तरस्य च पांड्यनस्य पल्लवस्य च क्षेत्राणि एतस्य राज्यस्य भागाः स्वायतीकृताः । राजराजप्रथमः यः सर्वेषु शक्तिशाली चोलशासकः मन्यते , 985 शताब्द्यां नृपः बभूव सः एव एतेषु अधिकतरेषु क्षेत्रेषु स्वस्य नियन्त्रणस्य विस्तारं कृतवान् । सः साम्राज्यस्य प्रशासनस्य अपि पुनर्घटनं कृतवान् ।

2 मानचित्रम् चोलराज्यं तस्य प्रतिवेशिनः च

राजराजस्य पुत्रः राजेन्द्रप्रथमः तस्य नीतिः नैरन्तर्येण स्थापितवन्तः सः गङ्गायाः उपत्यकायाः उपरि श्रीलङ्कायाः दक्षिण-पूर्वैशियायाः च देशेषु आक्रमणं च कृतवान् । एतेषाम् अभियानानां कृते सः एकां जलसेनाम् अपि रचितवान् ।

## भव्यमन्दिराणि कांस्यमूर्तिकलाः च

राजराजेन राजेन्द्रप्रथमेन च निर्मापितानां तंजावूरस्य गंगईकोंडचोलपुरस्य च बृहद्-मन्दिर-स्थापत्य-दृष्ट्या मूर्तिककलायाः च दृष्ट्या एकः चमत्कारः अस्ति ।

चोलमन्दिराणि प्रायः स्वस्य पार्श्वस्थानां विकासशीलानां निवासानां केन्द्रभूतानि जातानि । एते शिल्पोत्पादनस्य केन्द्राणि आसन् । एतानि मन्दिराणि शासकैः अन्यैः जनैः च प्रदत्तया भूम्या अपि सम्पन्नाः जाताः आसन् । एतस्य भूमेः उत्पादनं तेषां सर्वेषां विशेषज्ञानां निर्वाहार्थं व्ययीभवति स्म , ये मन्दिरस्य समीपे निवसन्ति स्म तेषां कृते पुरोहिताः कार्यं कुर्वन्ति स्म , मालाकारः पाचकः मलवाहकः अथवा प्रधानः



3-चित्रम्    गंगईकोंडचोलपुरस्य मन्दिरं

छदि येन प्रकारेण क्रमशः कृषा भवति इति दृष्टम्, तस्मिन् अवधानं कुर्वन्तु। बाह्याः भित्तिन् अलङ्कर्तुं पाषाणस्य याः प्रतिमाः अलङ्कृताः सन्ति ,ताः अपि पश्यन्तु ।

सङ्गीतकारः नर्तक इत्यादयः । अपरेषु शब्देषु मन्दिराणि केवलं पूजाराधनयोः च एव स्थानानि न आसन् तानि मन्दिराणि आर्धिकजीवनस्य सामाजिकजीवनस्य सांस्कृतिकजीवनस्य च केन्द्राणि अपि आसन् । मन्दिरैः सार्धं सम्बद्धेषु शिल्पेषु सर्वाधिकं विशिष्टम् आसीत् –कांस्यप्रतिमानां निर्माणस्य कार्यम् । चोलकालस्य कांस्यप्रतिमाः संसारस्य उत्कृष्टतराः कांस्यप्रतिमासु गण्यन्ते । अधिकतराः प्रतिमाः तु देवीनां देवतानां च एव भवन्ति स्म , परन्तु काश्चन् प्रतिमाः भक्तानाम् अपि निर्मिताः आसन् ।

**कृषिः सेचनव्यवस्था च**

चोलानां काश्चन् उपलब्ध्यः कृषौ जातानां नूतनानां विकासानां माध्यमेन सम्भवाः जाताः ।द्वितीये मानचित्रे पश्यन्तु । अवधीयतां यत् कावेरीनदी बङ्गालस्य आखाते मेलनात् पूर्वं बह्वीषु लघ्वीषु शाखासु विभक्ता जायते । एताः शाखाः पुनः पुनः जलं उद्वेलयन्ति,यतः तटेषु उर्वरामृत् तत्र तत्र लग्नाः भवति । शाखानां जलं विशेषतः तण्डुलस्य कृषेः कृते आवश्यकीम् आर्द्रतां अपि प्रयच्छति ।

यद्यपि तमिलनाडुराज्यस्य विविधेषु भागेषु कृषिः पूर्वतः एव विकसिता जाता आसीत् परञ्च पञ्चमम्यां षष्ठ्यां च शताब्द्यां आगत्य एव एतस्मिन् क्षेत्रे कृषिकार्यं बाहुल्येन प्रारब्धम् । केषुचित् क्षेत्रेषु वनानि कर्तनीयानि आसन् अपि च अपरेषु केषुचित् क्षेत्रेषु भूमिः समतला करणीया आसीत् । नदीतटपुलिनेषु जलौघं नियन्त्रयितुं तटबन्धाः क्रियन्ते स्म जलानि च क्षेत्राणि यावत् नेतुं कुल्यानां निर्माणं भवति स्म । केषुचित् क्षेत्रेषु वर्षाभ्यान्तरे सस्यद्वयं प्ररुह्यते स्म ।



4. चित्रम्

एका चोलकालस्य कांस्यप्रतिमा। कियत्सावधानं सा अलङ्कृता असि,एतां ध्यानं पश्यन्तु । एतादृश्यः प्रतिमाः कथं निर्मीयन्ते स्म,एतत् ज्ञातुं षष्ठाध्यायं पश्यन्तु ।



चित्रम् -5

नवम्याः शताब्द्याः तमिलनाडोः एकं जलद्वारम् । जलाशयात् नद्याः शाखासु जलस्य प्रवाहः अनेन नियन्त्र्यते स्म । एतेन जलेन क्षेत्राणि सिच्यन्ते स्म ।

केषुचित् स्थानेषु सस्यानां सेचनं कृत्रिमरूपेण करणीयमिति आवश्यकम् आसीत् । सेचनार्थं अनेकासां पद्धतीनां प्रयोगः क्रियते स्म । केषुचित् क्षेत्रेषु कूपाः खनिताः । केषुचित् अन्येषु क्षेत्रेषु वृष्टेः जलानि एकत्रीकर्तुं विशालाः सरोवराः निर्मिताः । स्मरन्तु यत् सेचनकार्ये योजनायाः आवश्यकताः भवति , यथा श्रमानां संसाधनानां च व्यवस्थितकरणम्, एतेषां कार्याणां पर्यवेक्षणम् इदं सुनिश्चीकरणं यत् जलस्य वण्टनं कथं स्यात् । अधिकतराः नूतनाः शासकाः सार्धम् एव ग्रामवासिनः जनाः एतासु गतिविधीषु सक्रियरूपेण रूचिं दर्शितवन्तः ।

**साम्राज्यस्य प्रशासनम्**

प्रशासनं कथं सङ्घटितम् आसीत् ? कृषकाणां निवासाः ये , “उर” इति उच्यन्ते स्म ,सेचित-कृषिणा सह बहुसमृद्धा जाता आसीत् । एतादृशानां ग्रामाणां समूहः नाडु इति उच्यते स्म । ग्रामपरिषद् नाडुः च न्यानकरणस्य करादानस्य च सदृशानां प्रकाशकीयकार्याणां सम्पादनं कुर्वन्ति स्म ।

वेल्लालजातेः धनाढ्याः कृषकाः केन्द्रियचोलसर्वकारस्य सन्निधौ नाडु इत्यस्य कार्ये सम्यक् नियन्त्रणं प्राप्तवन्तः आसन् । तेषु बहुभ्यः धनाढ्येभ्यः भूस्वामिभ्यः चोलराजानः समानरूपेण “मुवेंदवेलन” इति अर्थात् त्रयाणां नृपाणां कृते स्वस्य सेवायाः प्रदाता वेलन इति अथवा कृषकः । “अरइयार” अर्थात् प्रधानसदृशाः उपलब्धयः प्रदत्ताः तेभ्यः च केन्द्रे महत्त्वपूर्णानि रायकीयानि पदानि अर्पितवन्तः ।

**भूमेः प्रकाराः**

चोलाभिलेषु भूमेः विभिन्नानां कोटीनाम् उल्लेखः उपलभ्यते ।

*वेल्लनवगाई*

अब्राह्मणस्य कृषकस्वामिनः भूमिः

ब्रह्मदेयम्

ब्राह्मणेभ्यः उपाहाररूपेण प्रदत्ता भूमिः

शालाभोगः

कस्यचित् विद्यालयस्य संरक्षणार्थं भूमिः

देवदानम्,तिरुनमट्टुक्कनी

मन्दिरस्य कृते उपहाररूपेण प्रदत्तभूमिः

पल्लिच्चंदम

जैनसंस्थानेभ्यः दानरूपेण प्रदत्ता भूमिः ।

अस्माभिः दृष्टम् अस्ति यत् ब्राह्मणाः यथाकालं भूम्यनुदानम् अथवा ब्रह्मदेयं प्राप्तवन्तः । परिणामतः कावेरी-उपत्यकायाम् अथ च दक्षिण भारतस्य अपरेषु भागेषु सहस्रं ब्राह्मणनिवासाः अस्तित्वं गताः ।

प्रत्येकं ब्रह्मदेयस्य सम्भालनं प्रमुखानां ब्राह्मणभुस्वामिनां एका करोति स्म । एताः सभाः अतीव कुशलतापूर्वकं कार्यं कुर्वन्ति स्म। एतासां निर्णयाः शिलालेखेषु प्रायः मन्दिराणां पाषाणभित्तिषु विवरणसहितं दीयन्ते स्म । “नगरम्” इत्यस्य नाम्नः ज्ञातव्यापारिणां सङ्घाः अपि प्रायः नगरेषु प्रशासनिककार्याणि सम्पादयन्ति स्म ।

तमिलनाडुराज्यस्य चिंगलपुटजनपदस्य उत्तरमेरुरतः प्राप्तेषु अभिलेखेषु एवम्विधं वर्णनं सविस्तारम् अस्ति यत् ब्राह्मणानां सभायाः सङ्गटनं कीदृशम् आसीत् । सेचनव्यवस्थायाः कार्याणां कृते उद्यानां मन्दिर इत्यादीनां संरक्षणार्थं च सभायां विभिन्नाः समितयः भवन्ति स्म । एतासु सदस्यतार्थं ये जनाः योग्याः भवन्ति स्म. तेषां नामानि तालपत्रस्य लघुचिटिकासु लिख्यन्ते स्म मृत्पात्रेषु च स्थाप्यन्ते स्म अथ च कश्चित् लघुबालकः प्रत्येकं समितेः कृते क्रमशः एकैकशः एकां चिटिकां निष्कासयितुम् उच्यते स्म ।

**अभिलेखाः लिखितसामग्री च**

उत्तरमेरुरस्य अभिलेखस्य अनुसारं सभायाः सदस्यता :

सभायाः सदस्यतार्थम् इच्छुकैः जनैः एतादृश्याः भूमेः स्वामिभिः भवितव्यं यतः भूराजस्वं स्वीक्रियते ।

तेषां पार्श्वे स्वकीयं गृहं भवेत् । तेषां वयः 35 वर्षतः 70 वर्षाणां आभ्यन्तरे भवेत् । ते वेदानां ज्ञातारः भवेयुः ।

ते प्रशासनिकविषयाणां सम्यक् ज्ञातारः भवेयुः निष्ठावन्तः च भवेयुः ।

यदि कश्चित् गतत्रिभ्यः वर्षेभ्यः कस्याश्चित् समितेः सदस्यः स्यात् तर्हि सः कस्याश्चित् अन्यायाः समितेः सदस्यः न भवितुं शक्नोति । यः आत्मनः स्वसम्बन्धिनां च धान्याकोशान् अथवा सङ्ख्यानपञ्जिकायां येषां नामानि न योजितवान् स्यात् सः निर्वाचने भागं ग्रहीतुं शक्नोति ।

अभिलेखेषु नृपाणां शक्तिसम्पन्नानां च पुरुषाणां च विषये तु सूचनाः उपलभ्यन्ते परन्तु एतत् ज्ञानं दुष्करम् अस्ति यत् सामान्यपुरुषाणां स्त्रियानां च जीवनम् एतेषु राज्येषु कथम् आसीत् ? द्वादशशताब्द्याः तमिलकृतेः पेरियापूरणमतः एकम् उद्धरणं पश्यामः –

अडनूरस्य सीमासु तृणमयैः लघुकुटीरैः परावृतः पुलाया इति जनानाम् एकः लघुपुरवा इति आसीत्,यस्मिन् निम्नजातीयाः कृषिकर्मिणः निवसन्ति स्म । चर्ममयेषु गृहेषु कुक्कुटानां कुक्कुटीनां च समूहाः समूहेषु कुटीरान् परितः भ्रमन्ति स्म । कृष्णवर्णीयाः बालकाः ये कृष्णवर्णयुक्तानि कङ्कनानि धृत्वा विराजन्ते स्म ,लघुन् कुक्कुरशावकान् उत्थापयन्तः गच्छन्तः स्म । ... मारूद इति वृक्षाणां छायासु एका श्रमिकी स्वस्य शिशून् चर्ममये एकस्मिन् आच्छादके शाययितवती । आम्रवृक्षाः अपि सन्ति ,येषां वृक्षाणां शाखासु पणवाः अवलम्बिताः आसन् अथ च नारिकेलस्य वृक्षान् अधः भूमौ निर्मितेषु गर्तेषु लघुशिरस्काः शुनक्यः स्वशिशून् दुग्धं पाययित्वा शयितवत्यः आसन् । रक्तशिखकुक्कुटाः प्रातःकाले पुलैयार इत्येतं दिनचर्यायाः पालनात् प्राक् एव ध्वनिः कृता। धान्यं कुटन्तीनां लहरसदृशीनां पुलाया इति स्त्रीणां गीतस्य ध्वनिः प्रातःकाले कांजी इति वृक्षस्य छायायां विस्तारं गच्छति स्म ।...

? किं भवन्तः अनुभवन्ति यत् महिलाः एतासु सभासु सहभागितां कुर्वन्ति स्म ? किं भवन्तः अङ्गीकुर्वन्ति यत् समितीनां सदस्यानां चयनार्थं लाटरी इति एषः उपायः उपयोगी भवति ?

? किं एतस्मिन् पुरवे इत्यस्मिन् केचन ब्राह्मणाः आसन् ? यावत्यः गतिविधयः चलन्ति स्म तासां वर्णनं कुर्वन्तु । भवतां विचारस्य अनुसारं अभिलेखेषु एतेषां सर्वेषां उल्लेखः किमर्थं न कृतः अस्ति ?

अन्यत्र

**ताङगवंशस्य युगस्य चीनदेशः**

चीनदेशे ताङ्गराजवंशस्य अन्तर्गतम् एकम् साम्राज्यं स्थापितं जातम् ,यत् प्रायः त्रिशतं वर्षाणि यावत् अर्थात् सप्तमशताब्द्याः आरभ्यः दशमशताब्दीं यावत् सत्तायां अतिष्ठत् । एतस्य राजधानी शियान इति विश्वस्य बृहत्तमेषु नगरेषु एकः आसीत्, यत्र तुर्कीजनाः ईरानिजनाः जापानिजनाः कोरियाईजनाः आवगमनं कुर्वन्ति स्म ।

ताङ्गसाम्राज्यं परीक्षायाः माध्यमेन नियुक्तैः सेवकैः प्रशासितं भवति स्म । एतासु परीक्षासु प्रत्येकं इच्छुकः जनः उपवेष्टुं शक्नोति स्म । अधिकारिणां चयनस्य इयं व्यवस्था कैश्चित् परिवर्तनैः सह 1911 तं वर्षं यावत् अचलत् ।

भारतीयोपमहाद्वीपे प्रचलिताभ्यः व्यवस्थाभ्यः इयं व्यवस्था कया दृष्ट्या भिन्ना आसीत् ?

**कल्पनां कुर्वन्तु**

भवन्तः एकस्याः सभायाः निर्वाचने विद्यमानाः सन्ति । यत्किमपि भवन्तः पश्यन्ति शृण्वन्ति च तस्य वर्णनं कुर्वन्तु ।

**पुनः स्मरन्तु**

## 1 युग्मान् निर्मान्तु

गुर्जर-प्रतिहारः पश्चिमीदक्कनः

राष्ट्रकूटः बङ्गालः

पालः गुजरातः राजस्थानं च

चोलः तमिलनाडुः

2 **"त्रिपक्षीय-सङ्घर्षः"** इत्यस्मिन् युक्ताः त्रयः पक्षाः के के आसन् ?

3 चोलसाम्राज्ये सभायाः कस्याश्चित् समितेः सदस्यं भवितुम् आवश्यक्यः प्रतिभूतयः काः आसन् ?

4 चाहमानानां नियन्त्रणे आगम्यमाने द्वे प्रमुखनगरे के आस्ताम् ?

**आगच्छन्तु जानीमः**

5 राष्ट्रकूटाः कथं शक्तिशालिनः जाताः ?

6 नूतनाः राजवंशाः स्वीकृतिं प्राप्तुं किम् अकुर्वन् ?

7 तमिलक्षेत्रे किंप्रकारायाः सेचनव्यवस्थायाः विकासः जातः ?

8 चोलमन्दिरैः सह काः काः गतिविधयः युक्ताः आसन् ?

**आगच्छन्तु विचारयन्तु**

9 प्रथमं मानचित्रं पुनः पश्यन्तु अन्वेषयन्तु च यत् यस्मिन् प्रान्ते भवन्तः निवसन्ति, तस्मिन् कानिचन पुरातनानि लोकतन्त्राणि आसन् अथवा न आसन् ?

10 यादृशान् पंचायतिनिर्वाचनानि अद्य वयं पश्यामः , तेभ्यः उत्तरमेरुरस्य निर्वाचनानि केन प्रकारेण भिन्नानि आसन् ?

आगच्छन्तु कृत्वा पश्यामः

11 अस्मिन् अध्याये दर्शितेभ्यः मन्दिरेभ्यः स्वस्य परिवेशस्य कस्यचित् वर्तमानस्य मन्दिरस्य तोलनां कुर्वन्तु अथ च याः समानताः अन्तराणि च भवन्तः पश्यन्ति तानि बोधयन्तु ।

12 अद्यतनीये काले स्वीकृतानां कराणां विषये इतोऽपि ज्ञानं गृह्णन्तु । किं एते साक्षात्-धनस्य रूपे सन्ति ,वस्तुनः रूपे सन्ति अथवा श्रमसेवानां रूपे च सन्ति ?

**बीजशब्दः**

सामन्तमन्दिरं नाड्सभा

**इति द्वितीयोऽध्यायः**